shrIbAhuleyastavaH by shrInIlakaNThatIrthasvAmi

# श्रीनीलकण्ठतीर्थस्वामिविरचितः श्रीबाहुलेयस्तवः

## Document Information

Text title : Bahuleya Stavah by Nilakanthatirtha Swami

File name : bAhuleyastavaHnIlakaNThatIrthasvAmi.itx

Category : subrahmanya

Location : doc_subrahmanya

Transliterated by : PSA Easwaran

Proofread by : PSA Easwaran

Latest update : May 23, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# श्रीनीलकण्ठतीर्थस्वामिविरचितः श्रीबाहुलेयस्तवः

ऐश्वर्यमप्रतिममत्रभवान्कुमारः
सर्वत्र चावहतु नः करुणापणः सः ।
येनात्मवल्लुषितभाग्यपरार्ध्यभूमिः
स्वाराज्यसम्पदपि शश्वदहो सनाथा ॥ १॥

श्रीस्कन्दकल्पविटपी कुरुतात्स बाह्य-
माभ्यन्तरं च विभवं युगपत्सदा नः ।
दृग्व्यापृतिप्रतिमितिं भ्रमरावलीं यो
नित्यं बिभर्ति करुणामकरन्दपुष्टाम् ॥ २॥

भद्रं कृषीष्ट नितरामिह सैद्धसेनी(१)
सानुग्रहप्रकृतिनेत्रपरम्परा नः ।
मोहान्धकूपपतितेऽव्यभिचारतो द्राग्
या दोरकी(२) भवति तत्पदबद्धचित्ते ॥ ३॥

विद्या चतुर्दशतयी शरजन्मनाम्नि
यस्मिन्नु पर्यवसिताऽव्यवधानतो नः ।
पुष्णातु सैष सकलासु कलासु दाक्ष्यं
चिन्तामणिप्रतिभटी भवदङ्घ्रिरेणुः ॥ ४॥

षाण्मातुरस्मितवलच्छरदागमो मे
प्रज्ञासरोवरमलं विमलं दधातु ।
येनात्र सच्चितियुसुखैकरसात्मचन्द्रं
साक्षात्करोत्वनिदमात्मतयाऽयमेव ॥ ५॥

दद्युः श्रियस्त्रिभुवनाद्भुतबस्तुवार्द्धि-
मन्थाद्रिविभ्रमपटूनि गुहेक्षणानि ।
स्तन्यावसानसमये निजमातृवक्त्र-
पद्मे भ्रमद्भ्रमरिकालघुमन्थराणि ॥ ६॥

नैसर्गिकी यदपि भिन्नपुमाश्रयात्वं
वाचः श्रियस्तदपि यत्करुणाकटाक्षः ।
सूतेऽन्वहं निजजनेषु रविप्रभेव
श्लिष्टे नुमः परमकारुणिकं गुहं तम् ॥ ७॥

प्रत्यक्तया श्रुतिपुराणवचोनिगुम्फ-
स्तात्पर्यवान्भवति वर्णयितुं यमर्थम् ।
श्रेयांसि नैकविधया प्रकटं विदध्या-
त्सैषोऽग्निभूरिह परार्थसमुद्यमेषु ॥ ८॥

नैयत्यतो हृदि पदं स तनोतु बाल(३)-
चर्यः स्तिथिं य इह साक्षितयापि धत्ते ।
एवं च बुध्यरणितत्पदचित्रगूत्था(४)
संवित्तिदीपकलिकाखिलदीपिका स्यात् ॥ ९॥

यस्मिन्मनागपि मनः प्रणिधाय काय-
व्यूहादिसर्वविभवं प्रतिपद्यते ना ।
योगेश्वरेश्वरमितः कृकवा(५)कुकेतुं
भक्त्या व्रजामि शरणं करणैस्त्रिभिस्तम् ॥ १०॥

शब्दा(६)नुशासननयपतिनोऽत्र वर्ण
व्यङ्ग्यस्ततो भवति योऽर्थ इवातिरिक्तः ।
स्फोटः स एष इति यं कथयन्ति नित्यं
कुर्मस्तमेय इदि षण्मुखनामधेयम् ॥ ११॥

मार्गान्तरोक्त(७)विधया परमाणुवर्गे-
ष्वाद्यं समुन्मिषति जन्तुकृतेन कर्म ।
यस्यात्मसंविदुदयस्य विभोः सिसृक्षा-
वेलासु नौमि परकारुणिकं गुहं तम् ॥ १२॥

यद्यद्यन्न पूरयति ते चरणानुषङ्ग-
स्तत्तद्ध्यनुद्भवपराहतमेव विद्मः ।
वस्त्वीप्सितं क्वचिदपीशतनूज तस्मा-
न्नेत्रामृतप्रभ दृशोर्विषयस्त्वमेधि ॥ १३॥

वाचस्पतिप्रमुखवागपि यत्र कुण्ठी-

भावं प्रयाति तमिति प्रणुवन्न लज्जे ।
त्वद्भक्तिभारमुखरीकरणान्मृषित्वा
स्वामिन्विधेहि तदपीह कृपार्द्रदृष्टिम् ॥ १४॥

कालत्रयेऽपि करणत्रयसम्पदे नः
सर्वोत्तमत्वत इहाभिमतं तवापि ।
यद्यद्धि तत्तदखिलं करुणाम्बुवारि-
वाहाशु मे वितर हे भगवन्नमस्ते ॥ १५॥

श्रीबाहुलेयस्तवमुत्तमं यः
पठेत्प्रभाते प्रयतः स धीमान् ।
वागर्थविज्ञानघनाढ्यतामे-
त्यन्ते विशोकं पदमभ्युपेयात् ॥ १६॥

अर्भाह्वस्वामिपादाब्जमरन्दरसशीलिनः ।
श्रीनीलकण्ठतीर्थाख्यस्येदं स्वामि(८)समर्पणम् ॥ १७॥

नमो गुहाय । ॐ ॥

इति श्रीनीलकण्ठतीर्थस्वामिविरचितः श्रीमद्बाहुलेयस्तवः सम्पूर्णः ॥

Footnotes

Verse 3 (१) सिद्धसेनस्य=स्कन्दस्य-इयम् ।
(२) समुद्धरणोपयोगि रज्जुरिति भावः ॥
Verse 9 (३) बालचर्यः सिद्धसेन इति त्रि. शे. ।
(४) चित्रगुरुरुत्तरारणिः । ज्ञानं कृत्वा तु चित्रगुं द. मु. उप. ।
Verse 10 (५) मायण सः पु. दे. । केशित काममाया ॥
Verse 11 (६) वैयाकरणाः ।
Verse 12 (७) वैशेषिकोतगतः ।
Verse 17 (८) इमारतु सामी द्वादशलोचनः त्रि.शे.

Proofread by PSA Easwaran

*shrIbAhuleyastavaH by shrInIlakaNThatIrthasvAmi*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*